श्रीशङ्करः ब्रह्मसूत्रभाष्यञ्च

Dr. B. CHANDRIKA,
READER IN VEDANTA,
SREE SANKARACHARYA UNIVERSITY OF SANSKRIT,
KALADY.

अयं संसारः शोकभूयिष्ठो भवति। सर्वेऽपि जनाः अत्र येन केनापि प्रकारेण शारीरिकमानसिकपीडामनुभवन्ति। तथैव तदुत्तरेण नितरां प्रयत्नं कुर्वन्तो दृश्यन्ते। जननादारभ्य मृत्युपर्यन्तमनुभूयमानेभ्यः एभ्यः दुःखेभ्यः आत्मानं मोचयितुमुपायमन्विष्यद्भिरस्माकं पूर्वजैः तत्त्वज्ञानिभिः बहुदूरं गतः। तेषां कुशाग्रबुद्धावाविर्भूतानि तत्त्वानि पश्चात्सूत्रात्मकदर्शनरूपेण प्रसिद्धानीत्यवलोक्यते।

प्रायशः सर्वेषु दर्शनेषु मूलभूतत्त्वेन वेदोपनिषदामेव विचारः क्रियते पण्डितैः। दुःखनिवृत्त्युपायान्वेषणाय प्रवृत्ताः चिन्ताधाराः क्रमेण प्रपञ्चोत्पत्तिरहस्यप्रतिपादनेऽपि पर्यवसिता इति ज्ञातुं शक्यते। अनेनास्माभिः दर्शनोत्पत्तिमूलत्वेन न केवलमनुभूयमानानि दुःखानि, अपि तु प्रपञ्चरहस्यजिज्ञासा च आसीदिति वक्तुं शक्यत एव। दर्शनकाराः आचार्याः स्वस्वदर्शनोपयोगितया वेदोपनिषन्मन्त्राणां व्याख्यानं कृतवन्त इत्यवलोक्यते। अनेनैवोपनिषदां प्रतिपादने परस्परवैरुद्ध्यमस्तीति ज्ञातुं शक्यत एव।

अद्वैतसरणिस्थापनाय श्रीशङ्करेण कृतः प्रयत्नस्तु सर्वैरपि ज्ञात एव। परस्परनिगूढसिद्धान्तं पूर्वपूर्वाचार्यमतार्थरीत्या व्यवस्थापनाय अतिबुद्धिमता शङ्करभगवत्पादेन द्वे सरणी अवलम्ब्य उपनिषत्सिद्धान्तः स्थापितः। दृष्टान्तस्तु - उपनिषदां जगदुत्पत्तिप्रतिपादनपराणां वाक्यानां निर्देशः दृश्यते, तथैव जगतः ब्रह्माभिन्नप्रतिपादनपराणामपि वाक्यानां विनियोगः दृश्यते। विरुद्धयोरनयोः वाक्ययोः समन्वयः अनेन भगवता इत्थं क्रियते - यत् जगत्सृष्टिपराणां वेदान्तवाक्यानां प्रवृत्तिः तु तात्त्विकी न भवति किन्तु अपरा विद्या अथवा 'उपायः सोऽवताराय' इति। तथैवोपनिषदां यत् जगतः ब्रह्माभिन्नत्वकथनं व्यवस्थितं तदेव तात्त्विकी, तस्याः विद्यायाः नाम परा विद्येत्युभयविधविद्याप्रदर्शनपुरःसरो विरोधोऽयमनेन परिहृत अवलोक्यते।

दर्शनविभागेष्वतिमहत्तरं स्थानमलङ्करोति उत्तरमीमांसेत्यपरनामधेयेन प्रथितं वेदान्तदर्शनम्। बादरायणो नाम व्यासः भवति वेदान्तसूत्रप्रणेता। व्यासमधिकृत्य वा तच्छिष्यपरम्परामधिकृत्य वा श्रीशङ्करभगवत्पादमधिकृत्य वा तेषु एकैकमधिकृत्य वा मासमेकमुच्यते चेत्तथापि कथा न परिसमाप्यत इत्येतत्सुविदितम्, अतः एतेषाम् अर्थात् अद्वैतमताचार्यान् तथैव तैः विरचितग्रन्थानपि वा अधिकृत्य विस्तरभयेन अहं किमपि वक्तुं नेच्छामि, यतः तदधिकृत्य शास्त्रकृतामभिप्रायसमन्वयः अद्यापि न दृष्टः। अतः अस्मिन् प्रबन्धे अहं केवलं शङ्कराचार्यप्रणीतं ब्रह्मसूत्रभाष्यमधिकृत्य किञ्चित् वक्तुमुत्सहे।

अस्माकं पूर्वजाः ग्रन्थकाराः स्वस्वग्रन्थेषु स्वीयचरित्रमधिकृत्य किमपि न लिखितवन्त इत्यतः तेषां चिन्ता केवलं स्वीयग्रन्थ एव स्थिता अभूत् न स्वस्मिन्विधये। अर्थात् ते स्वीयमतानि लोकेषु प्रचारयितुम् इच्छन्तः अभूवन् न स्वान् इत्येतदेवास्मात् ज्ञातुं शक्यते। अस्याः चिन्तायाः कारणं तु तेषां तत्त्वदृष्टिरेवेत्येतदप्यस्माभिः न विस्मर्तव्यम्। अस्माभिः सर्वैरपि एतदेवानुकरणीयमिति ममाभिप्रायः। अत्र कः वदति

इति चिन्ता मास्तु, किं वदति इत्येव अस्तु। लोके तावत् प्रायशः कः वदति इति दृष्ट्वा पठति न तु किं वदति इति। इतः परं कः वदति इति चिन्ता मास्तु किं वदति इत्येवमस्तु। श्रीशङ्कराचार्यकृतिः चतुर्धा विभज्यते - भाष्यग्रन्थाः, प्रकरणग्रन्थाः, स्तोत्रग्रन्थाः. तन्त्रग्रन्थाश्चेति। भाष्यग्रन्थाः तावत् ब्रह्मसूत्रभाष्यं, भगवद्गीताभाष्यं, ईशादिदशोपनिषद्भाष्यं, सनत्सुजातीयभाष्यञ्चेति। प्रकरणग्रन्थानां बाहुल्यात् तेषां नामसङ्कीर्तनं कष्टं भवति तथापि विवेकचूडामणिः, आत्मबोधः, उपदेशसाहस्री इत्यादयो भवन्ति। ब्रह्मसूत्रादिभाष्यग्रन्थाः अत्यन्तं सुसूक्ष्मविषयप्रतिपादकाः भवन्ति इत्यतः तेषां लघुभूतया रीत्या ज्ञातुमुपयुज्यन्ते इतरसोपानग्रन्थाः। अर्थात् सोपानग्रन्थाध्ययनेन भाष्यादिप्रौढग्रन्थप्रवेशनयोग्यतां प्राप्नुवन्ति अधिकारिणः। मन्दमध्यममेधाविरूपेण अधिकारिणः त्रेधा विभक्ता दृश्यन्ते। तेषु मध्यमाधिकारिणमुद्दिश्य विरचिताः ग्रन्थाः भवन्ति प्रकरणग्रन्थाः, मेधाविनमुद्दिश्य विरचिताः ग्रन्थाः भवन्ति भाष्यग्रन्थाः, मन्दाधिकारिणमुद्दिश्य स्तोत्रग्रन्थाः विरचिताः। सर्वेषामपि शास्त्रे प्रवृत्तिः परमपुरुषार्थाय भवति। परमार्थज्ञानमेव मोक्षसाधनं तथापि फलनिरपेक्षेण क्रियमाणेन कर्मणा चित्तशुद्धिः जायते तेन तस्मिन् शुद्धसत्त्वे ज्ञानम् उदेति इति शङ्कराचार्याभिमतं मतम्। तथैव 'मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी' इति वाक्यात् तथैव 'स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते' इति भक्तिरपि मोक्षसाधनत्वेन अङ्गीकुर्वन्ति भगवत्पादाः। कर्मणां भक्तेश्च आत्मावबोधेनैव मोक्षसाधकत्वम्। अनेन विरचिताः स्तोत्रग्रन्थाः अनेके, तेषु प्रचुरप्रचाराः भवन्ति कनकधारास्तोत्रम्, दक्षिणामूर्तिस्तोत्रम्, सौन्दर्यलहरी, शिवानन्दलहरी चेति।

श्रीशङ्करः वेदानामपौरुषेयतया तेषां परमप्रामाण्यम् अङ्गीकरोति। तथैव तत्प्रतिपादितानि तत्त्वानि दृढतया अङ्गीकरोति, अवलम्बते च। सः वेदमार्गादीषदपि व्यतिचलितुं नेच्छति। तस्य मते इतरमतस्थापकाः आचार्याः स्वस्वदर्शनेषु वेदवाक्यानि स्वेच्छापरतया व्याख्याय तेषामपार्थं कृतवन्त इति। श्रीशङ्करस्तु तैः

कृतानेतादृशव्याख्यानाभासान् दूरीकृत्य वेदानां याथार्थ्यं स्फुटीकरोति। एतदेव भगवान् स्वगीताभाष्योपोद्घाते कथयति "दुर्विज्ञेयार्थं तदर्थाविष्काराय अनेकैः विवृतपदपदार्थवाक्यार्थन्यायमपि अत्यन्तविरुद्धानेकार्थत्वेन लौकिकैः गृह्यमाणमुपलभ्य अहं विवेकतः अर्थनिर्धारणार्थं संक्षेपतः विवरणं करिष्यामि"। एतद्भगवतः वचनं इतरेषामपि भाष्यग्रन्थानां स्वारस्यमिति वक्तुं शक्नुमः। व्याख्यानेन दूषणं वा भूषणं वा ग्रन्थस्य भवतीति अनेन द्रष्टुं शक्यते। अत्र प्रश्नः क इति चेत् परस्परविरुद्धानां मतानां चित्रीकरणं वैदिकसाहित्ये अतिबहुलया रीत्या दृश्यते। अतः अन्यदार्शनिकानां प्रवृत्तौ कश्चिद्दोषः अस्माभिः द्रष्टुं वक्तुं वा न शक्यते। परम् इदं तु न विस्मर्तव्यम् - यदि वयं सर्वेषां दर्शनानां तत्त्वं सूक्ष्मतया पश्यामः चेदिदमवश्यं ज्ञातुं शक्यते यत् एषां सर्वेषामेव दर्शनानां ललिततया समन्वयः कर्तुं शक्यत एव। अनेन अस्माभिः अस्मिन्नेव निगमनं प्राप्तुं शक्यते यत् आचार्याः स्वस्वबुद्धिगम्यानि तानि तत्वानि आत्मसात्कृत्य तदनुसारेण स्वस्वदर्शनम् उद्घोषयामास इति। अनेनैव कारणेन केचन पण्डिताः वदन्ति 'अधिकारिभेदेन दर्शनभेद' इति। तत्तु साधु इति प्रतिभाति।

ब्रह्मसूत्रभाष्यम्

वेदव्यासविरचितब्रह्मसूत्राणि अद्वैतमतस्य आधारभूतानि। ब्रह्ममीमांसा उत्तरमीमांसा शारीरकमीमांसा इत्याद्यपरनामधेययुक्तानि भवन्ति। अत्र पञ्चपञ्चाशदुत्तरपञ्चशतसूत्राणि भवन्ति।

ब्रह्मसूत्राध्यायचतुष्टयसंक्षेपः

प्रथमाध्यायः - समन्वयाख्यस्य प्रथमाध्यायस्य आद्येषु त्रिषु पादेषु जगतः जन्मादिकारणं ब्रह्मेति निरूपणपूर्वकं श्रुतिवाक्यैस्तत्प्रमाणितम्। श्रुतिषु च यथास्थलं प्रतीयमानः सन्देहः विचारपूर्वकं सयुक्तिकं निवारितः। आकाशः, आनन्दमयः, ज्योतिः, प्राण इत्यादयो ये ये शब्दाः ब्रह्मपरकाः न प्रतिभान्ति स्म तेषां सर्वेषामपि ब्रह्मवाचकत्वं

समुपपादितम्। किन्तु यत्र कुत्र श्रुतिषु सांख्यसिद्धान्तानुसारिणः पदार्था अपि समुपलभ्यन्ते तथैव ये श्रुत्यर्थं न सम्यगवगच्छन्ति ते, तानपि वेदमूलकान् प्रतिपादयन्ति। अतः स्वाभाविकतया तेषां श्रुतीनां वेदमूलकतानिरासार्थं चतुर्थपादः प्रवर्तते।

द्वितीयाध्यायः - अविरोधाख्यस्य द्वितीयाध्यायस्य प्रथमपादे सूत्रकारेण श्रुतिप्रतिपादितब्रह्मजगत्कारणत्वे सम्भावितान् सर्वान् मतभेदान् निरस्य ब्रह्मणो जगतः निमित्तोपादानोभयकारणत्वं प्रदर्शितम्। तस्य जीवाभिन्नत्वे श्रेष्ठत्वञ्च स्थापितम्। द्वितीयपादे सांख्योक्तपरिणामवादम्, वैशेषिकोक्तपरमाणुकारणवादम्, बौद्धैकदेशमतावलम्बिनां क्षणिकवादम्, योगाचाराभिमतं विज्ञानवादम्, माध्यमिकाभिमतं शून्यवादम्, जैनाभिमतं देहपरिणामवादम्, पाशुपताभिमतं ईश्वरस्य केवलनिमित्तकारणवादम्, एतत्सर्वं भगवता सूत्रकारेण बहुविधैर्युक्तिभिः निरस्य तेषां सर्वेषामपि अप्रामाणिकत्वं तथैव अश्रौतत्वं च स्थापितम्। तृतीयपादे सूत्रकारेण श्रुत्यादिकमवलम्ब्य ब्रह्मणः जगदुत्पत्तिमवधार्य जीवस्य अनादित्वं ब्रह्मणा सह तत्सम्बन्धं च श्रुतीनां युक्तीनां च आधारेण स्थापयित्वा स्वरूपतः जीवस्य परब्रह्मांशमात्रत्वमपि प्रतिपादितम्। चतुर्थपादे इन्द्रियाणामेकादशत्वं संस्थाप्य बुद्धेः इन्द्रियाणां च ब्रह्मकारणत्वं स्थिरीकुर्वता मुख्यप्राणस्वरूपनिर्णयो विहितः।

तृतीयाध्यायः - साधनाख्यस्य तृतीयाध्यायस्य प्रथमपादे जीवानां संसारगतिवर्णनपूर्वकं श्रुतिस्मृतिशास्त्रप्रमाणैः सयुक्तिभिश्च जीवेषु विषयवैराग्योत्पादनप्रयत्नः कृतः। द्वितीयपादे तु जीवानां स्वप्नावस्थाः विचार्य तदनन्तरं ब्रह्मणो सगुणनिर्गुणरूपेण द्वैरूप्यं प्रतिपाद्य ब्रह्मणः उपासनाया एव प्रयोजनीयत्वमिति प्रतिपादितम्। तृतीयपादे उपनिषदुक्तनानाविधब्रह्मोपासनाः विचार्य विभिन्नरूपेण ब्रह्मचिन्तनस्यैव तदुपासनासारत्वनिर्देशपुरःसरं साधकस्य स्वाधिकारानुरूपम् अन्यतमोपासनोपादानेनैव कृतकृत्यतेति कथितम्। चतुर्थपादे यागादिकर्मापेक्षया ज्ञानस्य स्वातन्त्र्यं तन्मोक्षफलदायित्वं

च प्रतिपाद्य संन्यासिनः गृहिणश्च उभयोः मोक्षाधिकारो व्यवस्थितः। इत्थं मोक्षसाधननिरूपणपूर्वकं प्रवर्तितः तृतीयाध्यायः।

चतुर्थाध्यायः - फलाख्यस्य चतुर्थाध्यायस्य प्रथमपादे मोक्षं प्रति अविश्रमसाधनावलम्बनस्य नितरामावश्यकत्वं प्रतिपाद्य उपासनाकाले साधकस्य आत्मचिन्तनप्रकारो वर्णितमवलोक्यते। उपासनासिद्धौ च जीवितपुरुषः कामवस्थां प्राप्नोतीत्यादिकमपि प्रतिपादितम्। द्वितीयपादे तु ब्रह्मविदः अर्चिरादिमार्गद्वारा ब्रह्मलोकगमनस्य तत्र परब्रह्मप्राप्तेश्च वर्णनं दरीदृश्यते। तृतीयपादे तु ब्रह्मविदः उत्क्रान्तिमार्गस्य तत्प्राप्तव्यस्य च स्पष्टतः निर्देशो विहितः। चतुर्थपादे स्वस्वरूपावाप्तौ जीवस्य बन्धनमुक्तदशा अवधारिता। एवं ब्रह्मज्ञानावाप्तेः तत्फलस्य च मुख्यतः वर्णनेनास्य फलाध्यायनामसार्थक्यम्।

ब्रह्मसूत्रभाष्यम् अधिकरणभेदेन विभक्तमवलोक्यते। अधिकरणलक्षणं तु -

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
सङ्गतिश्च फलञ्चेति षोढाधिकरणं मतम्।। इति।

यथा ईक्षत्यधिकरणे "तदैक्षत बहु स्यां प्रजायेय तत्तेजोऽसृजत" इत्यादि छान्दोग्यश्रुतिः विषयः। अत्र संशयः सच्छब्दवाच्यम् अचेतनं प्रधानं वा ईश्वरो वा ब्रह्म वेति। पूर्वपक्षः तु सच्छब्दवाच्यम् अचेतनं प्रधानमिति उत्तरं तु ब्रह्मैव इति। अत्र सच्छब्दवाच्यं ब्रह्मैव इत्यस्य अनेकाः युक्तयः निर्दिष्टाः अवलोक्यन्ते फलं तु तत्त्वज्ञानमेव।

श्रीशङ्करः अद्वैतसिद्धान्तस्थापनाय अस्माकं चिरपरिचितान् दृष्टान्तान् प्रदर्शयति। तेषु दृष्टान्तेषु अतिप्रबलः भवति शुक्तिरूप्यम्। भगवता स्वभाष्यग्रन्थस्यावतारिकायां अर्थात् अध्यासभाष्ये अध्यासलक्षणसमन्वयवेलायां दृष्टान्तत्वेनैतदुक्तम्। तत्तु यथा वयं शुक्तिकायां रजतं दृष्ट्वा वदामः इदं रजतमिति।

तथा अनात्मशरीरेन्द्रियादीन् आत्मन्यारोप्य गौरोऽहमित्यादिव्यवहारं कुर्मः। अपरस्तु पश्वादिभिश्चाविशेषादिति। अयं तु प्रशस्तः भवति। अस्माकं सर्वे प्रत्यक्षादिव्यवहाराः, शास्त्रादीनि च अविद्यावद्विषयाणि भवन्ति। विवेकिन इति मिथ्याभिमानं वहन्तः अज्ञानिनः वयं पशूनिव भवामः। अपरस्तु 'अप्रत्यक्षे ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति'। आत्मा अप्रत्यक्षः, कथमनात्मनामारोपो तस्मिन्नात्मनि इति प्रश्नवेलायामुक्तमेतत्। प्रत्यक्षादिकमारोपे न तन्त्रम्, अतः अप्रत्यक्षेऽप्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति।

सूत्राणि अल्पाक्षरघटितानि लघुवाक्यानि भवन्ति। भाष्यलक्षणन्तु -

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भष्यं भाष्यविदो विदुः।।

एतदनुसारेण भाष्यकारेण उपनिषद्वाक्यानुद्धृत्य सूत्रस्य पुरतः प्रदर्श्य प्रकरणवशेन अर्थप्रतिपादनं, तेषां पूर्ववाक्यानां तथैव उत्तरवाक्यानां च सङ्गतिश्च प्रदर्श्य तेषां प्रकरणप्रदर्शनं, विमर्शनबुद्ध्या वीक्षणं, पाणिनीया दिव्याकरणशास्त्रग्रन्थानुद्धृत्य पदानाम् अर्थव्युत्पत्तिप्रदर्शनं, व्यवहारभेदादिप्रदर्शनं, यथासन्दर्भं इतरवाद्यभ्युपगतमतखण्डनं चेत्यादिकं सर्वं भाष्यकारैः करणीयं कार्यं भवति। तत्सर्वं प्रदर्शितम्। तस्य एकसूत्रभाष्यपठनेनैव सः अतीव बुद्धिमान् तथैव अनितरसाधारणप्रतिभावान् च भवति इत्येतत् अस्माभिः सुष्ठु ज्ञातुं शक्यत एव। अस्मिन् भाष्ये वेदान्तवाक्यकुसुमग्रथनम् अतिस्फुटतया कृतं तेनेत्यत्र न कश्चित्सन्देहः।

ब्रह्मसूत्रभाष्येण भगवता भाष्यकारेण श्रीशङ्करेण उद्घोषितान् वेदान्तविषयान् अतीव संक्षेपेण वक्तुं प्रयत्नं करोमि।

१. यस्मात् कारणात् जगतः जन्मादि सम्भवति तद्ब्रह्मैव। एतद्विषये भाष्यकारेण द्वितीयसूत्रव्याख्यानावसरे सम्यक् स्पष्टीकृतम्।

२. ब्रह्म एकमेव सत्यं वस्तु तद्भिन्नं सर्वं असत्यम् ।

३. ब्रह्मैव परमात्मा ईश्वरः सद् आनन्दः प्राणः अपरः इत्यादि अनेकनाम्ना व्यवह्रियते।

४. ऋग्वेदादिसकलशास्त्राणां योनिः भवति, कारणं प्रभवस्थानं भवति तत् ब्रह्म। एतत् श्रीशङ्करः ब्रह्मसूत्रस्थतृतीयसूत्रव्याख्यानावसरे कथयति। ब्रह्मणः जगज्जन्मादिकारणत्वे तथैव ऋग्वेदादिशास्त्रोद्भवकारणत्वे प्रमाणमप्यनेनैव सूत्रेण ज्ञायते।

५. यथा मृद्विज्ञानेन तद्विकारजातं सर्वं विज्ञायते तथा जगत्कारणीभूतब्रह्मज्ञानेन सर्वं कार्यजातं (प्रपञ्चं) विज्ञायते।

६. जीवात्मपरमात्मनोः कश्चित् भेदः नास्ति।

७. केवलं परमात्मनः आभासमात्रं भवति अथवा प्रतिबिम्बमात्रः भवति जीवात्मा। अस्मत्प्रत्ययविषयत्वं नानात्वबुद्धिहेतुत्वं, पारतन्त्र्यस्वभावयुक्तत्वं, विकारयुक्तत्वं, भोक्तृस्वभावत्वं, एतत्सर्वं जीवात्मनः धर्माः भवन्ति। जीवात्मनि शरीरादिवृत्तिधर्माध्यासकारणेन आरोपिता भवन्ति इति यावत्।

८. अविद्याजन्यभ्रान्तिरेव दुःखात्मकस्य संसारस्य मूलम्। तत्तु आत्मज्ञानं विना न नश्यति।

९. ज्ञानिनां कर्मापेक्षा नास्ति। तेषां सर्वकर्मसंन्यास एव अधिकारः। प्रमातृत्वं, प्रमेयत्वं, उपासकत्वं, उपास्यत्वं, उपसनावत्वं इत्यादिकं सर्वं ज्ञानिनां कृते न प्रयोक्तुं शक्यते।

१०. श्रवणेन मननेन निदिध्यासनेन च द्रष्टव्यं भवति ब्रह्मणः स्वरूपम्।

११. वस्तुतः सर्वे वयं मुक्ताः भवामः। तथापि संसारिणः वयं मनोमालिन्यनिमित्तमस्माकं निजस्वरूपं विस्मरामः। अभ्यासवैराग्याभ्यां मनसः एतादृशाविद्यायाः निरासे

सति ज्ञानम् आविर्भवति। एतदेव वेदान्तप्रसिद्धो मुक्तिः। तत्तु जीवन्नेव साधयितुं शक्यते तदेव जीवन्मुक्तिः इति कथ्यते।

१२. यस्य मनसि 'अहं ब्रह्मास्मि' इति बोधः उदेति तस्य संसारबन्धः नश्यति।

१३. ज्ञानिनः शरीरसम्बन्ध एव नास्ति।

१४. आत्मज्ञानस्य प्रमाणभूतानि भवन्ति श्रुतिस्मृतीतिहासपुराणानि स्वानुभवश्च। एता अद्वैतवेदान्तस्य मुख्याः चिन्ताधाराः भवन्ति।

श्रीशङ्कर एव अद्वैतमतस्थापक इति केचित् अभिप्रयन्ति परन्तु तत्र साधु। यतः तस्मात् पूर्विकाः बहवः आसन्, तेषु मुख्याः व्यासगौडपादगोविन्दभगवत्पादादयः। भगवतः भाष्यकारस्य कर्तव्यं तु एतदासीत् यत् अन्यमतानुयायिभिः दूषिताद्वैतवेदान्तमतस्य पुनरुत्थापनमेव। तदर्थं भाष्यकारः किं किम् अकरोदिति संक्षिप्य वक्ष्यामि।

१. सः अद्वैतसिद्धान्तस्य मूलभूतानां भगवद्गीतायाः ब्रह्मसूत्रस्य उपनिषदश्च भाष्यं विरच्य कैश्चिज्जनैः अत्यन्तविरुद्धार्थत्वेन दूषितार्थानां तेषां विवेकतः यथार्थार्थनिर्धारणं कृत्वा अद्वैततत्त्वपथं लोकाय प्रादर्शयत्।

२. स्वतन्त्रवेदान्तसोपानग्रन्थान् लिखित्वा भाष्यग्रन्थे प्रवेष्टुमसमर्थान् साधारणजनान् प्रति सुगममार्गं प्रादिशत्। तेषां प्रकरणग्रन्थानाम् अभावे तु मध्यमाधिकारिणां भाष्यग्रन्थेषु प्रवेशनं नातिसुलभं स्यात्। अत एव ते सोपानग्रन्था इति नाम्ना प्रथिता भवन्ति।

३. भगवान् मन्दाधिकारिणः प्रति ईश्वरभक्तिं वर्धयितुं स्तोत्रग्रन्थरचनां कृत्वा तेषां भक्तियोगद्वारा मुक्तिमार्गं प्रादर्शयत्। मोक्षमार्गं प्रति लघुतमोपायो भवति भक्तिमार्गः। तथापि ज्ञानद्वारैव तत्सिध्यति इति श्रीशङ्करः उद्घोषं करोति।

४. भारते आसेतुहिमाचलं पद्भ्यां भ्रमन् परमतखण्डनपुरःसरं स्वमतम् अस्थापयत्। भारते चतुर्षु भागेषु मठान् स्थापयित्वा यावत् आचन्द्रार्ककालपर्यन्तम् अद्वैतं भवतु इति मत्वा अचार्यानपि अनियोजयत्।

५. स्वशिष्यान् शास्त्राभ्यासं कारयित्वा स्वमतप्रचारणार्थं नियोजितवान्।

६. मठस्थापनद्वारा संन्यासाश्रमपरिरक्षणं कृतवान्। स्वेनैव गीतोपोद्घाते उक्तम्- वेदोक्तः धर्मः द्विविधः भवति - प्रवृत्तिलक्षणः निवृत्तिलक्षणः चेति। वेदधर्मसंरक्षणाय न केवलं कर्मयोगिनामावश्यकता अपि तु संन्यासिनामपि अत्र निवासः आवश्यक एव।

७. सांख्यादिप्रमुखमतखण्डनपुरःसरमद्वैतसिद्धान्तं स्थापितवान्।

अनेनैव श्रीशङ्कराचार्यस्य योगदानं बृहत्तरमासीत् इति ज्ञातुं शक्यत। तत्तत्कालोद्भूतैः बहुभिः पण्डितैः ब्रह्मसूत्राणां भाष्याणि विरचितानि भवन्ति इति भाष्यादेव ज्ञातुं शक्यते। तथापि श्रीशङ्करप्रणीतसूत्रभाष्यमेव लोकेषु प्रचुरप्रचारं प्राप्तम्। अनेनैव हेतुना भाष्यस्य प्रागल्भ्यं प्रामाण्यञ्च सिद्धमवलोक्यते। अनेन 'व्याख्याता वेत्ति न सूत्रकारः' इत्येतत् भाष्यमधिकृत्य समीचीनमेव।। शम्।।